श्रीमार्कण्डेय उवाच ।
आकर्ण्य तस्या वचनं वशिष्ठो ब्रह्मणः सुतः ।
स्वयं स सर्व्वकृत्यज्ञो नान्यत् किञ्चन पृष्टवान् ॥
अथ तां नियतात्मानं तपसेऽतिष्ठतोद्यमाम् ।
वशिष्ठो मन्त्रयाञ्चक्रे गुरुवत् शिष्यवत्तदा ॥
वशिष्ठ उवाच ।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमः परमाराध्यो विष्णुर्मनसि धीयताम् ॥
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ।
ॐ नमो वासुदेवाय इत्यनेन च सन्ततम् ॥
मार्कण्डेय उवाच ।
उपदिश्य वशिष्ठोऽथ सन्ध्यायै तपसः क्रियाम् ।
तामाभाष्य यथान्यायं तत्रैवान्तर्दधे मुनिः ॥
यथोक्तन्तु वशिष्ठेन मन्त्रं तपसि साधनम् ।
व्रतेन तेन गोविन्दं पूजयामास भक्तितः ॥
प्रसन्नस्तेन रूपेण यद्रूपं चिन्तितं तया ।
पुरः प्रत्यक्षतां यातस्तस्यां विष्णुर्जगत्पतिः ॥
निमीलिताक्ष्यास्तस्यास्तु प्रविश्य हृदयं हरिः ।
दिव्येन्द्रियं तदौ तस्यै वाचं दिव्ये च चक्षुषी ॥
दिव्यं ज्ञानं दिव्यचक्षुर्दिव्यां वाचमवाप्य सा ।
प्रत्यक्षं वीक्ष्य गोविन्दं तुष्टाव जगतां पतिम् ॥
अथ तस्याः शरीरन्तु वल्कलाजिनसंवृतम् ।
परिक्षीणं जटाव्रातैः पवित्रं मूर्द्ध्नि राजितम् ॥
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम् ॥
श्रीभगवानुवाच ।
यः पश्यति सकामस्त्वां पाणिग्राहस्तते तव ।
स सद्यः क्लीवतां प्राप्य दुर्बलत्वं गमिष्यति ॥
पतिस्तव महाभागस्तपोरूपसमन्वितः ।
सप्तकल्पान्तजीवो च भविष्यति सह त्वया ॥
अन्यच्च ते वदिष्यामि पूर्व्वं यन्मनसि स्थितम् ।
अग्नौ शरीरत्यागस्ते पूर्व्वमेव प्रतिश्रुतः ॥
स च मेधातिथेर्यज्ञे मुनेर्द्वादशवार्षिके ।
घृतप्रज्वलिते वह्नौ न चिरात् क्रियतां त्वया ॥
तत्र गत्वा स्वयं छन्नं मुनिभिर्नोपलक्षिता ।
मत्प्रसादाद्वह्निजाता तस्य पुत्री भविष्यसि ॥
यस्ते वा वाञ्छनीयोऽस्ति स्वामी मनसि कश्चन
तन्निधाय निजस्वान्ते त्यज वह्नौ वपुः स्वकम् ॥
नारायणः स्वयं सन्ध्यां पस्पर्शाथाग्रपाणिना ।
ततः पुरोडाशमयं तत् शरीरमभूत् क्षणात् ॥
समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता ।
तदा विष्णोः प्रसादेन सा विवेश विधेः सुता ॥
वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले ।
शुद्धं प्रवेशयामास विष्णोरेवाज्ञया पुनः ॥
सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रथे ।
स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥
यदूर्द्ध्वभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः ।
प्रातःसन्ध्याभवत् सा तु अहोरात्रादिमध्यगा ॥
यच्छेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः ।
सा सायमभवत् सन्ध्या पितृप्रीतिप्रिया सदा ॥
सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः ।
प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी ॥
अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा ।
उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी ॥
इति कालिकापुराणे २२ अध्यायः ॥

प्रातःकालकर्त्तव्यवैदिकतान्त्रिकोपासनाविशेषः
वैदिके तदनुष्ठानानि यथा । मार्ज्जनम् १ प्रार्थनम् २ प्राणायामः ३ आचमनम् ४ आपोमार्ज्जनम् ५ अघमर्षणम् ६ सूर्य्योपस्थानम् ७ देवतर्पणम् ८ सावित्र्यावाहनम् ९ सावित्रीध्यानम् १० सावित्रीजपः ११ सावित्रीविसर्जनम् १२आदित्यशुक्रप्रोक्षणम् १३ आत्मरक्षणम् १४ रुद्रोपस्थानम् १५ ब्रह्मादिभ्यो जलदानम् १६ सूर्य्यार्घदानम् १७ सूर्य्यनतिः १८॥ तान्त्रिके तदनुष्ठानानि यथा । मन्त्राचमनम्१ जलशुद्धिः २ करन्यासः ३ अङ्गन्यासः ४ अघमर्षणम् ५ हस्तचालनम् ६ आचमनम् ७ सूर्य्यार्घदानम्८ गायत्र्या जलदानम्९ तर्पणम् १० गायत्रीध्यानम् ११ गायत्रीजपः १२ जपसमर्पणम् १३ इष्टदेवध्यानम् १४ प्राणायामः १५ मूलमन्त्रजपः१६जपसमर्पणम् १७ प्राणायामः १८ नमस्कारः १९ । इति स्मृतितत्त्वे ॥

प्रातःस्नानं,क्ली,(प्रातः प्रभातकाले यत् स्नानम्।) प्रभातकर्त्तव्यावगाहनादि । यथा,गारुड़े ५०अः
"उषःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः ।
स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि ॥
प्रातःस्नानेन पूयन्ते येऽपि पापकृतो जनाः ।
तस्मात् सर्व्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्ट करं हि तत् ।
सुखसुप्तस्य सततं लालाद्याः संस्रवन्ति हि ॥
अतो नैवाचरेत् कर्म्माण्यकृत्वा स्नानमादितः ।
अलक्ष्मीः कालकर्णी च दुःस्वप्नं दुर्व्विचिन्तितम्
प्रातःस्नानेन पापानि पूयन्ते नात्र संशयः ।
न च स्नानं विना पुंसां प्राशस्त्यं कर्म्म-
संस्मृतम् ।
होमे जप्ये विशेषेण तस्मात् स्नानं समाचरेत्
अशक्तावशिरस्कन्तु स्नानमस्य विधीयते ॥"
अपि च गारुड़े २१५ अध्याये ।
"प्रातःसंक्षेपतः स्नानं मध्याह्ने विधिविस्तरम् ।
प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ॥
यतेस्त्रिसवनं प्रोक्तं सकृत्तु ब्रह्मचारिणः ॥"
अपि च ।
"उषस्युषसि यत्स्नानं सन्ध्यायामुदिते रवौ ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम् ॥
यत् फलं द्वादशाब्दानि प्राजापत्यैः कृतैर्भवेत् ।
प्रातःस्नायी तदाप्नोति वर्षेण श्रद्धयान्वितः ॥
य इच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान्
प्रातःस्नायीभवेन्नित्यं द्वौ मासौ माघफाल्गुनौ॥
षट्तिलौ माघमासन्तु प्रातःस्नायी हविष्यभुक्
अतिपापं महाघोरं मासादेव व्यपोहति ॥
मातरं पितरञ्चापि भ्रातरं सुहृदं गुरुम् ।
समुद्दिश्य निमज्जेत द्वादशांशं लभेत्तु सः ॥"

प्रातराशः,पुं, (अशनमिति । अश+भावे घञ्। आशः । प्रातः प्रातःकाले आशो भोजनम् ।) प्रातःकालीनभोजनम् । तत्पर्य्यायः । कल्यवर्त्तः २ । इति हेमचन्द्रः ॥ प्रातर्भोजनम् ३ । इति त्रिकाण्डशेषः ॥ कल्यजग्धिः ४ । इति जटाधरः ॥ (यथा, भागवते । ३ । २ । २ ।
"यः पञ्चहायनो मात्रा प्रातराशाय याचितः ।
तन्नैच्छद्रचयन् यस्य सपर्य्यां बाललीलया ॥")

प्रातर्गेयः,पुं,प्रातःकाले गेय ईश्वरादिर्यैः । स्तुतिपाठकः । तत्पर्य्यायः । स्तुतिव्रतः २ । इति त्रिकाण्डशेषः ॥ प्रभातगातव्ये, त्रि ॥

प्रातर्भोक्ता, [ऋ] पुं, (प्रातर्भुङ्क्ते इति । भुज+तृच् ।) काकः । इति शब्दचन्द्रिका ॥ प्रभाते भोजनकर्त्तरि, त्रि ॥

प्रातर्भोजनं, क्ली, (प्रातः प्रातःकाले भोजनम् ।) प्रातराशः । इति जटाधरः ॥

प्रातिका, स्त्री, (प्रात्ततीति । प्र+अत्+ण्वुल्-टाप् । अत इत्वम् ।) जवा । इति राजनिर्घण्टः ॥

प्रातिपदिकः, पुं, (प्रतिपदि तिथौ भव इति । प्रतिपद्+"कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् ।) अग्निः । यथा,—
"इत्यश्रुतो महानग्निर्ब्रह्मक्रोधोद्भवो महान् ।
उवाच देवं ब्रह्माणं तिथिर्मे दीयतां प्रभो ! ॥
यस्यामहं समस्तस्य जगतः ख्यातिमाप्नुयाम् ।
ब्रह्मोवाच ।
देवानामथ यक्षाणां गन्धर्व्वाणाञ्च सत्तम ! ।
आदौ प्रतिपदा येन त्वमुत्पन्नोऽसि पावक ! ॥
त्वत्पदात् प्रातिपदिकं सम्भविष्यन्ति देवताः ।
अतस्ते प्रतिपन्नाम तिथिरेषा भविष्यति ॥"
इति वराहपुराणम् ॥
(प्रतिपदे धातुभिन्नपदे भव इति । प्रतिपद+ठक् ।)नाम्नि, क्ली, । यथा, अधातुविभक्त्यर्थवत् प्रातिपदिकम् । इति सुपद्मव्याकरणम्

प्रातिभाव्यं,क्ली,(प्रतिभू+ष्यञ् । द्विपदहद्धिः ।) प्रतिभुवो भावः । जामिनी इति भाषा । यथा,
"साक्षित्वं प्रातिभाव्यञ्च दानं ग्रहणमेव च ।
विभक्ता भ्रातरः कुर्य्युर्नाविभक्ताः परस्परम् ॥"
इति दायभागः ॥

प्रातिस्विकं,त्रि,(प्रतिस्वं भवः । प्रतिस्व+ठक् । असाधारणम् । तत्पर्य्यायः । अन्यासाधारणम् २ आवेणिकम् ३ । इति त्रिकाण्डशेषः ॥

प्रातिहारः, पुं, (प्रतिहार एव । स्वार्थे अण् ।) प्रातिहारिकः । इत्यमरटीकायां भरतः ॥

प्रातिहारकः, पुं, (प्रतिहारक एव । स्वार्थे अण् ।)प्रातिहारिकः इत्यमरटीकायां भरतः ॥

प्रातिहारिकः, पुं, (प्रतिहारः प्रतिहरणं व्याज इत्यर्थः । स प्रयोजनमस्येति । प्रतिहार+"प्रयोजनम् ।" ५ । १ । १०९ । इति ठञ् ।) मायाकारः । इत्यमरः । २ । १० । ११ ॥

प्रातीपः, पुं, (प्रतीपस्यापत्यं प्रतीपस्यायमिति वा । प्रतीप+अण् ।) प्रतीपपुत्रः । शान्तनुराजः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १४८ । २ ।
'प्रातीपः शान्तनुस्तात ! कुलस्यार्थे यथोत्थितः॥)